ध्यायन् यस्य पदाम्भोजं भरतः साश्रुलोचनः ।
अवसत् त्यक्तराज्यश्री रामचन्द्रं नमामि तम् ॥१७॥

गुहराजोऽप्यहन् पाप यच्चरणाम्बुपानतः ।
भवदारिद्र्यहन्तारं रामचन्द्रं नमामि तम् ॥१८॥

उपादानं निमित्तंच जगतोऽस्य प्रभुः परः ।
ध्येयोऽमोघश्च वन्द्यो यो रामचन्द्रं नमामि तम् ॥१९॥

मुच्यते स्मरणाद्यस्य सद्यो भवभिया नरः ।
ब्रह्मेशाद्यमरैर्वन्द्यं रामचन्द्रं नमामि तम् ॥२०॥

रामानन्दप्रशिष्येणानुभवार्येण निर्मिता ।
पठता ध्वान्तहृद् भूयाच्छ्रीरामचन्द्रविंशतिः ॥

—o—

श्रीजानकीशो विजयतेतराम् ।
आनन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्याय नमः ।
श्रीअनुभवानन्दद्वारपीठसंस्थापक—
जगद्गुरुश्रीअनुभवानन्दाचार्यप्रणीता

श्रीगीतार्थसुधा

उत्पत्त्यादिविधायकं च जगतो हेतुं परं चेश्वरं
जीवाजीवशरीरिणं सुशरणं मुक्त्यैव सायुज्यदम् ॥
निर्दोषं सुगुणाकरं निखिलविद्वेदान्तगम्यं विभुं
गीतोक्तं वरदं नतोऽस्मि करुणाम्भोधिं प्रभुं राघवम् ॥१॥

नत्वा गुरुं तथाऽऽनन्दभाष्यकार जगद्गुरुम् ।
करोम्यनुभवानन्द सुधा मृत्युविनाशिनीम् ॥२॥

कर्मज्ञानप्रसाध्या भगवति परमा भक्तिरेकोभ्युपाय
श्रेष्ठो मोक्षस्य वाच्यो मतमितिविदित ज्ञापयिष्यन्मुकुन्द ।
धर्माधर्मप्रसंगाद् विकलितमनस पार्थमुद्दिश्य गीता-
माहोपोद्घातरूप सुदृढमभिहितस्तत्र चाद्य प्रपाठ ॥३॥

प्रोक्तौ देहात्मबुद्ध्या स्वजनममतया बालिशे मोहशोकौ
क्षीयेते तौ च बोधात् फलमतिरहितात् कर्मण सोऽपि सिध्येत् ।
तस्माद् भक्ति परेशे नियमितमनसा प्राप्यते सत्त्ववृद्ध्या
तस्या शान्तिर्ध्रुवात्मा फलमिदमशिषत् कृष्णचन्द्रो द्वितीये ॥४॥

ज्ञानं कर्मेति निष्ठाद्वयमिह जगति प्राहुराम्नायविज्ञा
कर्मारम्भ विहाय क्षणमपि भजते नैव कश्चित् प्रशान्तिम् ।
तस्मात् कर्मानुवृत्तिर्भगवति मनसा न्यस्य कर्माणि सम्यक्
कर्त्तव्या पुण्यपुसा गलितफलतृषा प्रोक्तमेतत् तृतीये ॥५॥

प्रोक्ता कर्मप्रसगान्निजविभवकथा नित्यकर्माणि पश्चात्
कर्माकर्मस्वरूप मतिसृतिमशिषत् कर्मभि सम्प्रवृत्ताम् ।
यज्ञाना द्वादशानामनुकथनमितो ज्ञानयज्ञस्य मौर्ख्यं
ज्ञानाग्निर्नाशयत्येव वृजिनानचय तूर्य इत्यभ्यधत्त ॥६॥

ज्ञानाकार विधत्ते श्रुतिविदितपरं कर्म सन्ध्यानं
सन्यासस्तस्य नेष्ट सममतिरुदिता ह्यात्मलब्धेरुपाय ।

भोगानां दुःखदत्त्वाद्विरतिरतितरां पण्डितैस्तेभ्य इष्टा
स्वर्थानेतानवादीत् प्रणतसुरतरुः पञ्चमे वासुदेवः ॥ ७॥

योगाभ्यासस्य रीतिर्विरतिरतिशया संसृतेर्मोहजाला-
च्चातुर्विध्यं प्रतीतं सममतिरधिको योगिनां तत्र चोक्तः ।
योगस्योत्कृष्टसिद्धिः परगतिफलका श्रद्धया यः स युक्तो
योगिवेप्तेषु चेड्य भजति हरिमिति प्राह षष्ठे पदार्थान् ॥८॥

याथार्थ्यं स्वस्य चोक्तं जगति जनचयो मायया मोहमाप्त-
स्तामेतां तर्तुकामैः स्वरिपुचरणे सुप्रपत्तिर्विधेया ।
सेवा देवान्तराणां परिमितफलदा नैव कार्या प्रपन्नै-
र्ज्ञानी श्रेष्ठः समेषामितिमतमवदत् सप्तमे श्रीमुकुन्दः ॥९॥

प्रश्नाः पार्थस्य सप्त प्रतिवचनमथो वर्णनं चान्तिमस्य
ब्रह्माऽनुध्यानतोऽद्धा ह्यसुगतिसमये ब्रह्मभावं सदैति ।
क्षेत्रज्ञस्याप्युपास्तौ प्रकृतिविरहिणः सद्गतिः सैव शुक्ला
हेतुर्नैवागतेः सा सृतिरितिभगवानष्टमे स्पष्टमाख्यत् ॥१०॥

माहात्म्यं स्वस्य दिव्यं जगति भगवतो व्याप्तिरन्तः समस्मिन्
भक्त्याराध्यः परेशः सुमहितमनसां लक्षणं कार्यमेषाम् ।
आवृत्तिश्चात्र मूयो विलयमुपगते कर्मिणां स्वर्गलोके
ब्रह्मोपास्तेः स्वरूपं तनमिनि नवमे प्रादिशद् देवदेवः ॥११॥

व्याप्तं वित्तं समस्तं किल चरमचरं येन सर्वाधिपेना-
त्रासीमैश्वर्यशाली विमलगुणनिधिर्यः स्वतन्त्रः परात्मा ।

यत्स्वायत्तस्वरूपस्थितिगतिरुदिता यद्विभूतिस्त्वनन्ता
सर्वात्मा सोऽयमेक. प्रभुरितिदशमे निश्चिकायादिदेवः ॥१२॥

पार्थश्चैशं दिदृक्षुर्हि वपुरतितत चर्मचक्षुर्न योग्यं
तस्मै दत्त्वा तु दिव्यं स्वमयमयजनकं दर्शयामास कृष्णः ।
मेघान् विद्युन्महोघ्रान् क्षितिजलधियुतान् सूर्यचन्द्रादिदेवान्
दृष्ट्वा देवस्य देहे शरणमुपगतोऽवोचदेकादशेऽर्थान् ॥१३॥

श्रेष्ठोपायस्तु मुक्तेर्भगवति सुदृढा प्रीतिरेकैव शुद्धा
तत्राशक्तस्य कर्मण्यभिरुचिरुचिता ह्यात्मनिष्ठस्य पुंसः ।
आत्मोपास्तेः प्रकारा अतिरतिमदिशत् स्वस्य भक्ते परेशः
स्वार्थानेतानवादीच्छ्रुतजनरतिकृद् द्वादशे च प्रपाठे ॥१४॥

क्षेत्रक्षेत्रज्ञरूपं प्रकृतिपुरुषयोर्भेद आत्मस्वरूप-
ज्ञानोपायास्तथाऽत्र त्रिगुणपुरुषयोर्योगतो विश्वसृष्टिः ।
कर्तृत्वे हेतुरेका प्रकृतिरथ पुमान् भोक्तृभावे च हेतु-
र्बन्धोच्छेदो विवेकात् त्रिमहितदशमे शौरिणोक्ता इमेऽर्थाः ॥१५॥

सूते विश्वं समस्तं प्रकृतिरनुपमा ब्रह्मस्वायत्तमूर्तिः
सत्त्वादीनां त्रयाणां प्रकृतिगुणतया देहिनो बन्धकत्वम् ।
लिङ्गं कार्यञ्च तेषां स्वलु मतिकृतिभिर्दर्शितं तत्क्रमोऽयं
बन्धो मुक्त्या प्रहेयो द्विगुणित उदिताः समकेऽर्था मुदेते ॥१६॥

संसारोऽश्वत्थवृक्ष. श्रुतिविदितपदोऽभ्यक्तमूलश्च तं वै
छित्त्वाऽसङ्गास्त्रयत्नात्या प्रपदननिशं राघवेशो विधेयम् ।

बद्धान्मुक्तात् परश्चोत्तमपुरुष इति ख्यात ईश स्वतन्त्रो
भर्त्ता चास्म्येक एवावददिति दशमे पञ्चयुक्तेऽर्थजातम् ॥१७॥

दैवी सम्पज्जनाना भवति सुकृतिना मुक्तये कर्मबन्धा-
न्नित्य बन्धाय लोके कुटिलमतिजुषामासुरी सा दुरन्ता ।
कार्याकार्यव्यवस्था दिशति हिततम शास्त्रमेतस्य त्याग-
श्चासुर्या मूलमुक्तं निरयफलमिमे षोडशे वर्णितार्था ॥१८॥

वैध शास्त्रीयकर्म त्रिगुणपरवशं यज्ञदाने तपश्च
त्रैविध्य तस्य वेद्यं सुकृतियुतनरै सात्विकै सात्विकं वै ।
प्राह्यं नैवासुरं तत् खलु फलरहितं लक्षण तस्य सम्यक्
श्रीमत्कृष्णेन चोक्तं वरमिह दशमे सप्तयुक्ते प्रपाठे ॥१९॥

सन्यास त्यागरूपो जगति मनुजै सत्वमालम्बनीय
सीतानाथ परेशोऽमलगुणजलधिर्दिव्यदेहोऽवतारी ।
सर्वज्ञ सर्वशक्ति कृतिचयफलद कर्मणा सविधाता
सायुज्य तत्प्रपत्त्या भवति तनुभृता प्रोक्तमन्त्येऽत्र चैतत् ॥२०॥

श्रीगीतार्थसुधा चैषाऽनुभावानन्दनिर्मिता ।
जन्ममृत्युविनाशाय भूया-मननशालिनाम् ॥२१॥
(स्वशताब्दीमहोत्सवे जगद्गुरुश्रीअनुभवानन्दाचार्योपदिष्ट प्रबन्ध)

—•—